# प्रश्न–पत्राणाम् अङ्.क–विभाजन–पत्रम् (ब्लू प्रिंट)
## परीक्षा–उच्चतर माध्यमिक छात्राणां कृते
## (हायर सेकेण्डरी)

कक्षा – एकादशी　　　　　　　　　　　　　　पूर्णांक :– 100

विषय – संस्कृत (सामान्यम्)　　　　　　　　　　समय :– घण्टात्रयम्

| स.क्र. | इकाई | इकाई अनुसोरण आवंटिताङ्कः | अङ्.कवार–प्रश्नानां संख्या | | | | | पूर्ण प्रश्नाः |
|---|---|---|---|---|---|---|---|---|
| | | | 01 अङ्.कः | 04 अङ्.कः | 05 अङ्.कः | 06 अङ्.कः | 10 अङ्.कः | |
| 1. | सन्धिः | 03 | 03 | – | – | – | – | 03 |
| 2. | समासः | 04 | 04 | – | – | – | – | 04 |
| 3. | शब्दरूपाणि | 03 | 03 | – | – | – | – | 03 |
| 4. | धातुरूपाणि | 03 | 03 | – | – | – | – | 03 |
| 5. | अव्ययानि | 04 | 04 | – | – | – | – | 04 |
| 6. | प्रत्ययाः | 04 | 04 | – | – | – | – | 04 |
| 7. | वर्णपरिचयः | 02 | 02 | – | – | – | – | 02 |
| 8. | रिक्तस्थानपूर्तिः | 03 | 03 | – | – | – | – | 03 |
| 9. | युग्म–मेलनं | 04 | – | 01 | – | – | – | 01 |
| 10. | एकपदेन प्रश्नोत्तराणि | 04 | – | 01 | – | – | – | 01 |
| 11. | एकवाक्येन प्रश्नोत्तराणि | 06 | – | – | – | 01 | – | 01 |
| 12. | कारकप्रयोगः | 05 | – | – | 01 | – | – | 01 |
| 13. | शुद्धा–शुद्धौ | 04 | – | 01 | – | – | – | 01 |
| 14. | वाच्यपरिवर्तनम् | 04 | – | 01 | – | – | – | 01 |
| 15. | पर्याय/विलोमचयनम् | 04 | – | 01 | – | – | – | 01 |
| 16. | सुभाषितम् | 04 | – | 01 | – | – | – | 01 |
| 17. | संस्कृत साहित्यपरिचयः | 04 | – | 01 | – | – | – | 01 |
| 18. | अपठितांशः | 05 | – | – | 01 | – | – | 01 |
| 19. | गद्यम् | 08 | – | 02 | – | – | – | 02 |
| 20. | पद्यम् | 08 | – | 02 | – | – | – | 02 |
| 21. | पत्रलेखनम् | 04 | – | 01 | – | – | – | 01 |
| 22. | निबन्धलेखनम् | 10 | – | – | – | – | 01 | 01 |
| | **पूर्णयोगः** | **100** | **26** | **12** | **02** | **01** | **01** | **42** |

निर्देश : –

प्रश्नपत्रे विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः। पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

# प्रादर्श प्रश्न पत्र

# कक्षा – एकादशी

# सामान्य संस्कृतम्

**समयः– घण्टात्रयम्** **पूर्णाङ्काः–100**

---

निर्देशा :– (1) सर्वे प्रश्नाः करणीयाः ।

(2) प्रश्नानां सम्मुखे अङ्काः दत्ताः ।

प्र. 1. त्रयाणां प्रश्नानाम् उचितविकल्पं चित्वा लिखत – 3

1– ''मनोरथः'' इत्यत्र सन्धिः अस्ति –

अ– स्वर सन्धिः ब– विसर्ग सन्धिः

स– व्यञ्जन सन्धिः द– यण्स्वर सन्धिः

2– ''इतस्ततः'' इति पदस्य सन्धिविग्रहं भवति –

अ– इतस् + ततः ब– इति+ततः

स– इतः + ततः द– इती + इती

3. ''पठत्येवः'' इत्यत्र सन्धिः अस्ति –

अ– स्वरसन्धिः ब– व्यञ्जन सन्धिः

स– यण् स्वरसन्धिः द– गुण स्वरसन्धिः

4. विसर्ग सन्धेः उदाहरणं नास्ति –

अ– कश्चित् ब– दिगम्बरः

स– नमस्ते द– शिवो वन्द्यः

प्र. 2 शुद्ध कथनस्य समक्षं (✓) तथा अशुद्ध कथनस्य समक्षं (X) चिन्हं कोष्ठके लिखत – 4

1. चौरभयम् – द्वितीया तत्पुरूष समासः ( )
2. उपवधु – अव्ययीभाव समासः ( )
3. यथाशक्ति – कर्मधारय समासः ( )
4. पितरौ – द्वन्द्व समासः ( )

प्र. 3. अ– कोष्ठकात् उचित विभक्तिपदं चित्वा वाक्यत्रयाणां वाक्यपूर्तिः क्रियताम् – 3

1. सः ––––––– क्रीडति (कन्दुकेन / कन्दुकं / कन्दुकात)
2. मम –––– नाम श्रीकृष्णः (पितुः / पिता / पित्रा)

3. —————— अनुजः नवमकक्षायां पठति। (माम्/मत्/मम)

4. सः —————— सह गच्छति। (माता/मात्रा/मातुः)

प्र. 3 ब. उचितैः धातुरूपैः त्रीणि वाक्यानि पूरयत – 3

1. श्रद्धावान ——————— ज्ञानम् (लभ् + लट्लकार)

2. त्वं कदा ———————। (गम् + लृट् लकार)

3. माता कार्यं ———————। (कृ + लट् लकार)

4. अहं जलं ——————— । (पा + लृट् लकार)

प्र. 4. अधोलिखितेषु शब्देषु अव्ययानि चित्वा लिखत – 4

| | | | |
|---|---|---|---|
| 1. | पुनीतः | 4. | गतः |
| 2 | उच्चैः | 5. | श्वः |
| 3. | सर्वदा | 6. | अधुना |

प्र. 5. सम्यक् मेलनं कुरूत – 4

| क | | ख | |
|---|---|---|---|
| अ– | नश् + क्त्वा | अ– | आसीनः |
| ब– | लभ् + क्त | ब– | क्रन्दनीया |
| स– | अस् + शानच् | स– | नष्ट्वा |
| द– | क्रन्द + अनीयर् | द– | लब्धः |

प्र. 6 अधोलिखितानां वर्णानां समुचितम् उच्चारणस्थानं चित्वा लिखत । 2

(i) य् –तालु / दन्त (ii) ल् – दन्तः / कण्ठ–तालुः

प्र. 7 अ– प्रदत्तशब्द द्वारा त्रयाणां वाक्यानां रिक्तस्थानपूर्तिः करणीया – 3

(महर्षि कणादः, मीमांसा, महर्षिः पतञ्जलिः, महर्षि गौतमः)

(i) न्यायदर्शनस्य प्रवर्तकः .................... अस्ति ।

(ii) योगदर्शनं ................... उपदिष्टवान् ।

(iii) महर्षिः जैमिनीः .................... दर्शनस्य प्रवर्तकः अस्ति ।

(iv) .............. वैशेषिकदर्शनस्य प्रवर्तकः ।

ब– युग्म–मेलनं कुरूत – 4

| | |
|---|---|
| क– सुखदुःखे समे कृत्वा | क– नैवं पापमवाप्स्यसि । |
| ख– ततो युद्धाय युज्वस्व | ख– समाना ह्रदयानि वः । |
| ग– समानी व आकूतिः | ग – यज्ञस्य देवमृत्विजम् । |
| घ– अग्निमीळे पुरोहितम् | घ– लाभालाभौ जयाजयौ । |

प्र. 8 निम्नलिखितप्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन देयानि –4

(i) भयावहः कः भवति ?

(ii) वाचस्पतिमिश्रः कां सानुरोधं पृच्छति ?

(iii) योगेन किं भवति ?

(iv) ''कर्त्तव्यपरायणः'' पाठः कुतः गृहीतः अस्ति ?

(v) दिलीपस्य धर्मपत्न्याः नाम किमासीत् ?

प्र. 9 निम्नलिखितप्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन देयानि–6

(i) किं नाम दर्शनम् ?

(ii) पशोः जीवनं कीदृशं भवति ?

(iii) कीदृशं मित्रं वर्जयेत् ?

(iv) जालकैः शिलाखण्डं कुत्र प्राप्तम् ?

प्र. 10 अधोलिखितेषु पञ्च–अशुद्धवाक्यानां शुद्धिः करणीया । 5

(i) देशाय परितः सैनिकाः सन्ति ।

(ii) भानुप्रकाशः नेत्रं काणः अस्ति ।

(iii) ईश्वरः भक्तिः रोचते ।

(iv) अश्वः पादेन धावति

(v) बालकः सिंहेन बिभेति

(vi) ग्रामात् दूरं विद्यालयः अस्ति ।

प्र. 11 शुद्धवाक्यानां समक्षे 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – 4

क– मित्रस्य चक्षुषा समीक्षामहे । –––––– ।

ख– मा गृधः कस्यस्विधनम् । –––––– ।

ग– अकुलीनोऽपि विनीतः कुलीनात्सामान्यः। –––––– ।

घ– मर्यादातीतं न कदाचिदपि अविश्वसेत् । –––––– ।

प्र. 12 चतुर्णां वाक्यानां निर्देशानुसारं वाच्यपरिवर्तनं कुरूत – 4

(i) सः पत्रं लिखति ।(कर्मवाच्ये)

(ii) रामेण ग्रन्थः पठ्यते । (कर्तृवाच्ये )

(iii) नरेन्द्रः लेखं लिखति । (कर्मवाच्ये)

(iv) अनिकेतेन गृहं गम्यते । (कर्तृवाच्ये )

(v) सः रोटिकां खादति । (कर्मवाच्ये )

प्र. 13 – अ–पदद्वयस्य समानार्थिशब्दं लिखत – 2

(i) शिष्यम् (ii) संशयः (iii) गुरवे

ब– पदद्वयस्य विपरीतार्थिशब्दं लिखत – 2

(i) श्रद्धया (ii) अप्रियम् (iii) वन्द्यानि

प्र. 14 – प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्कात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत – 4

प्र. 15– संस्कृतभाषायां चतुर्णां प्रश्नानाम् उत्तराणि लिखत ।– 4

(i) महाभारतं केन रचितम् ?

(ii) आदिकाव्यस्य रचयिता कः ?

(iii) कति पुराणानि सन्ति ?

(iv) कति स्मृतयः सन्ति ?

(v) गद्यकाव्यलेखने कः कविः विश्वप्रसिद्धः ?

प्र. 16 अधोलिखितगद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5

आतंकवादः आधुनिक विश्वस्य गुरूतमा समस्या अस्ति ।आतंकवादः विनाशस्य सा लीला या विश्वं ग्रसितुं तत्परा अस्ति । सर्वशक्तिमान् अमेरिकादेशोऽपि अनेन संतप्तः अस्ति । भारतं तु आतंकवादेन अनेकैः वर्षैः पीडितः वर्तते । शान्तीच्छुकैः देशैः आतंकवादस्य राक्षस्य विनाशाय मिलित्वा एवं प्रयत्नाः समाधेयाः अन्यथा एषा समस्या सुरसामुखम् इव प्रतिदिनं वृद्धिं यास्यति।

(i) आंतकवादः कस्य लीला ?

(ii) कीदृशैः देशैः मिलित्वा आतंकवादस्य विनाशाय प्रयत्नाः समाधेयाः

(iii) कः आतंकवादेन अनेकैः वर्षैः पीड़ितः ?

(iv) एषा समस्या किम् इव वृद्धिं यास्यति ?

(v) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं यच्छत ।

प्र. 17 – अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि – 8

अ– वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमद । सत्यान्न प्रमदितव्यम् ।धर्मान्न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । ये के चास्मच्छ्रेयांसो ब्राह्मणाःतेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रियादेयम् ।

(i) आचार्यः अन्तेवासिनं कदा अनुशास्ति ?

(ii) के त्वया आसनेन प्रश्वसितव्याः ?

(iii) कस्मात् प्रमादः न कर्त्तव्यः ?

(iv) ष्स्वाध्यायान्मा'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत ।

ब– ''जैनधर्मः'' अनादिकालात् इति जैन धर्मावलम्बिनः मन्यते। अत्र चतुर्विंशतिः तीर्थङ्कराः स्वीकृताः। प्रथमः तीर्थङ्करः भगवान् ऋषभदेवः अन्तिमश्च महावीरस्वामी। जैनधर्मः ''आर्हत–धर्मः'' इत्यपि कथ्यते। बौद्धधर्मस्य उदयः जैनधर्मस्य अनन्तरमेव ।अस्य प्रवर्तकः गौतमबुद्धः भारतीयावतारेषु प्रतिष्ठितः।

(i) जैनधर्मस्य प्रथमः तीर्थङ्कराः कः अस्ति ?

(ii) जैनधर्मे कति तीर्थङ्कराः स्वीकृताः ?

(iii) अवतारेषु कः प्रतिष्ठितः ?

(iv) ''इत्यपि'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।

स– आसीत् गोदावरीतीरे विशालः शाल्मलीतरूः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणौ निवसन्ति स्म। अथ कदाचिदवसन्नायां रात्रयामस्ताचलस्थिते भगवति कुमुदिनीनायके चन्द्रमसि तत्रैव कश्चिद् व्याधस्तण्डुलान् विकीर्य जालं विस्तीर्य प्रच्छन्नौ भूत्वा स्थितश्च। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पस्तांस्तण्डुलकणान् अवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह। ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः। एतन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। सर्वथाऽविचारितं कर्मं न कर्त्तव्यम्।

(i) शाल्मली तरूः कुत्र अस्ति ?

(ii) कपोतराजस्य नाम किम् आसीत् ?

(iii) ''कर्त्तव्यम्'' इत्यस्य पदस्य धातुप्रत्ययञ्च पृथक्कुरूत।

प्र.–18 अधोलिखत पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि – 8

अ– स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाविश्ववेदाः।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पर्तिदधातु।।

(i) अरिष्टनेमि कः ?

(ii) बृहस्पतिः कः ?

(iii) श्लोके ''वृद्धश्रवाः'' विशेषणस्य प्रयोगः कस्य कृते कृतः ?

(iv) विश्ववेदाः कः ?

ब– देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तर प्राप्तिर्धीरस्तत्र न मुह्यति।।

(i) तत्र कः न मुह्यति ?

(ii) देहिनः देहे प्रथमा अवस्था का ?

(iii) देहिनः देहे द्वितीया अवस्था का ?

(iv) ''देहे'' इत्यस्य पदस्य विभक्तिः वचनञ्च लिखत।

स– भुवमवतीर्णा नाकस्पर्धिनी।
भारतधरणीयं मामकजननीयम्।।
शिरसि हिमालय–मुकुट–विराजिता
पादे जलधिजलेन परिप्लुता
काश्मीरेषु च वर्षति तुहिनम्।।

(i) नाकस्पर्धिनी का अस्ति ?

(ii) कस्याः शिरसि हिमालयः मुकुटरूपेण विराजते ?

(iii) तुहिनं कुत्र वर्षति ?

(iv) पादे केन परिप्लुता ?

प्र. 19 स्वस्य प्राचार्यस्य कृते दिवसत्रयस्य अवकाशप्रार्थनापत्रं संस्कृते लिखत – 4

अथवा

स्वस्य भगिन्याः विवाहोत्सवे आमन्त्रयितुं स्वमित्रस्य कृते एकं पत्रं लिखत।

प्र. 20 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत। 10

1– परोपकारः 2– सदाचारः 3– कालिदासः

## प्रादर्शउत्तरम्

समय :– घण्टात्रयम् | कक्षा – एकादशी संस्कृत सामान्यम् | पूर्णाङ्काः–100

---

उ.1 1 X 3 = 3

1– ब– विसर्गसन्धिः

2– स– इतः + ततः

3– स– यण् स्वरसन्धिः

4– ब– दिगम्बरः

उ.2 1 X 4 = 4

1. X
2. ✓
3. X
4. ✓

उ. 3अ 1 X 3 = 3

1. कन्दुकेन
2. पितुः
3. मम
4. मात्रा

ब. 1 X 3 = 3

1. लभते
2. गमिष्यसि
3. करोति
4. पास्यामि

उ. 4– 1 X 4 = 4

उच्चैः, सर्वदा, श्वः, अधुना

उ. 5– 1 X 4 = 4

अ– नश् + क्त्वा स– नष्ट्वा

ब– लभ् + क्त द– लब्धः

स– अस् + शानच् अ– आसीनः

द– क्रन्द् + अनीयर ब– क्रन्दनीया

उ. 6 वर्णानां समुचितम् उच्चारणस्थानम् – 1 X 2 = 2

(1) तालु (2) दन्तः

उ0 7 अ– रिक्तस्थानपूर्तिः करणीया – 1 X 3 = 3

(1) महर्षिगौतमः (2) महर्षिपतञ्जलिः

(3) मीमांसा (4) कणादः

ब– युग्म–मेलनं करणीयम् – 1 X 4 = 4

क – घ ख – क

ग – ख घ – ग

उ0 8 एकपदेन उत्तराणि देयानि – 1 X 4 = 4

(1) परधर्मो भयावहः भवति।

(2) वाचस्पितिमिश्रः महिलां सानुरोधं पृच्छति।

(3) योगेन चित्तवृत्तिः निरोधः भवति।

(4) ''शिवराजविजयः'' इति ग्रन्थात् गृहीतः।

(5) दिलीपस्य पत्न्याः नाम ''सुदक्षिणा'' आसीत्।

उ0 9 एकवाक्येन उत्तराणि देयानि – 2 X 3 = 6

(1) दृश्यते अनेन इति दर्शनम्।

(2) पशोः जीवनं निरूद्देश्यं भवति।

(3) परोक्षेकार्यहन्तारं प्रत्यक्षे प्रियवादिनम् एतादृशं मित्रं वर्जयेत्।

(4) जालकैः शिलाखण्डं नर्मदायाः महाह्रदे प्राप्तम्।

उ0 10 – कारकप्रकरणम (अशुद्ध वाक्यानां शुद्धिः) 1 X 5 = 5

(1) देशं परितः सैनिकाः सन्ति।

(2) भानुप्रकाशः नेत्रेण काणः अस्ति।

(3) ईश्वराय भक्तिः रोचते।

(4) अश्वः पादैः धावति।

(अ) बालकः सिंहात् बिभेति।

(1) ग्रामस्य दूरं विद्यालयः अस्ति।

उ. 11 अशुद्धवाक्यानां शुद्धि :— 1 X 4 = 4

(1) आम् (2) आम् (3) न (4) न

उ0 12 — वाच्यपरिवर्त्तनम् — 1 X 4 = 4

(1) तेन पत्रं लिख्यते ।

(2) रामः ग्रन्थं पठति।

(3) नरेन्द्रेण लेखः लिख्यते ।

(4) अनिकेतः गृहं गच्छति।

(5) तेन रोटिका खाद्यते।

उ0 13 — समानार्थिशब्दाः— 1 X 2 = 2

(1) शिक्षकम् (2) संदेहः / शंका (3) अध्यापकाय / शिक्षकाय

ब — विपरीतार्थिशब्दाः — 1 X 2 = 2

(1) अश्रद्धया। (2) प्रियम् (3) अनवन्द्यानि

उ0 14 प्रत्येक शुद्ध सुभाषितस्य कृते अङ्कद्वयं निर्धारितम् । 2 X 2 = 4

उ0 15 महाभारतं वेदव्यासेन रचितम्। 1 X 4 = 4

(2) आदिकाव्यस्य रचयिता महर्षिः वाल्मीकिः अस्ति।

(3) पुराणानि अष्टादश सन्ति।

(4) स्मृतयः अष्टादश सन्ति।

(5) गद्यकाव्यलेखने महाकविः ''बाणभट्टः'' विश्वप्रसिद्धः।

उ0 16 अपठितगद्यांशः — 1 X 5 = 5

(1) आतंकवादः विनाशस्य लीला।

(2) शान्तीच्छुकैः देशैः मिलित्वा आतंकवादस्य विनाशाय प्रयत्नाः समाधेयाः।

(3) भारतवर्ष : आतंकवादेन अनेकैः वर्षैः पीड़ितः।

(4) एषा समस्या ''सुरसामुखम् इव'' वृद्धिं यास्यति।

उ0 17 अ — वेदमनूच्याचार्यो ....................................................श्रिया देयम्। 1 X 4 = 4

(1) वेदमनूच्याचार्यो अन्तेवासिनम् अनुशास्ति ।

(2) अस्मच्छ्रेयांसो ब्रह्माणाः आसनेन प्रश्वसितव्याः ।

(3) स्वाध्यात् प्रमादः न कर्त्तव्यः।

(4) सन्धिविच्छेदम् — स्वाध्यायात् + मा

सन्धेः नाम — व्यञ्जन सन्धिः

ब – जैनधर्मः ......................................................................................................प्रतिष्ठितः।

(1) जैनधर्मस्य प्रथमः तीर्थङ्करः भगवान् ऋषभदेवः अस्ति।

(2) जैनधर्मे चतुर्विंशतिः तीर्थङ्कराः स्वीकृताः।

(3) गौतमबुद्धः अवतारेषु प्रतिष्ठितः।

(4) इत्यपि = इति + अपि = यण् स्वरसन्धिः।

स – आसीत् ..................................................... कर्त्तव्यम्।

(1) शाल्मलीतरूः गोदावरीतीरे आसीत्।

(2) कपोतराजस्य नाम 'चित्रग्रीवः' आसीत्।

(3) व्याधेन तण्डुलकणाः विकीर्णाः।

(4) कर्त्तव्यम् = कृधातु + तव्यत् प्रत्यय।

उ0 18 अ – स्वस्ति न ........................................................दधातु। 1 X 4 = 4

(1) अरिष्टनेमिःतार्क्ष्यः अस्ति।

(2) बृहस्पतिः देवगुरूः आसीत्।

(3) ''वृद्धश्रवा'' विशेषणः इन्द्रस्य कृते प्रयुक्तः।

(4) पूषा विश्ववेदाः अस्ति।

ब– देहिनो ..........................................................................................................मुह्यति।

(1) धीरः तत्र न मुह्यति।

(2) देहिनः देहे प्रथमा अवस्था कौमारं भवति।

(3) देहिनः देहे द्वितीया अवस्था यौवनं भवति।

(4) देहे – सप्तमी विभक्तिः एकवचनम्।

स– भुवमतीर्णा ..........................................................................................तुहिनम्।

(1) भारतधरणीयं नाकस्पर्धिनी अस्ति।

(2) भारतमातायाः शिरसि हिमालयः मुकुटरूपेण विराजते ।

(3) तुहिनं काश्मीरेषु वर्षति।

(4) पादे जलधिजलेन परिप्लुता ।

उ. 19 पत्रे सङकेतं सम्बोधनं, दिनाङ्कं दृष्टवा शुद्ध पत्रस्य कृते अङ्काः निर्धारिताः सन्ति। 4

उ. 20 – सम्पूर्णशुद्धनिबन्धस्य कृते दश अङ्काः निर्धारिताः सन्ति। 10